संस्कृतवार्ता:
14/03/2025
सायम्  - 06:20

मुख्यवार्ताः

- वर्णानां पर्व्व होलिकोत्सवः अद्य अशेषे हि देशे अतीव हर्षप्रकर्षेण समाचर्य्यते। अत्रावसरे राष्ट्रपतिना, उपराष्ट्रपतिना, प्रधानमन्त्रिणा च सर्वेभ्य: देशवासिभ्य: स्वकीयाः शुभकामनाः प्रकटीकृताः।
- युक्रेनदेशे जायमाने संघर्षे निरन्तरम् अवधानाय रूस्देशस्य राष्ट्रपतिना व्लादिमीर् पुतिनेन प्रधानमन्त्रिणं नरेन्द्रमोदिनं, अमेरिकीराष्ट्रपतिं डोनाल्ड ट्रम्प इत्येतं समेत्य विश्वस्य नेतृभ्यश्च स्वीया कृतज्ञता प्रकटिता।
- केन्द्रीयविज्ञान-प्रौद्योगिकी-राज्यमन्त्री जितेन्द्र-सिंह: अद्य प्रोक्तवान् यत् पूर्वोत्तरभारतं विकसितभारतस्य स्वप्नं पूरयितुं मुख्यप्रेरकशक्तिः वर्तते।
- केन्द्रीय-वित्तमन्त्री निर्मला-सीतारामन इत्येषा आर्थिक-सर्वेक्षण-पुस्तिकायां मूलरुप्यकस्य प्रतीकपरिवर्तनार्थं डी-एम-के-सर्वकारस्य आलोचनां विहितवती।
- भारतेन पञ्चविंशत्यधिक-द्विसहस्रतमवर्षस्य विश्वपैरा-एथलेटिक्स-ग्रैण्ड-प्रिक् इत्यस्मिन् चतुःत्रिंशोत्तरैकशतपदकैः सह पदकतालिकायां शीर्षस्थानं उररीकृतम्।

होलिकोत्सवः

वर्णानां पर्व्व होलिकोत्सवः अद्य अशेषे हि देशे अतीव हर्षप्रकर्षेण समाचर्य्यते। जनाः परस्परवर्णलेपनेन संगीतोल्लासेन च ऐतं पर्व्व आभारते परिपालयन्तस्सन्ति। उत्सवोऽयं अधर्मस्योपरि धर्मस्य जयः इत्याधारीकृत्य आमन्यते। सहैव अयमुत्सवः वसन्तागमनमपि संसूचयति। होलिकेति पर्व्व समता-सौहार्दभावनायाश्च सन्देशमपि प्रसारयति। अस्मिन् पर्व्वणि जनाः जातिवर्णसम्प्रदायादिकं विस्मृत्य महदुत्साहेन एकीभूय अस्याचरणं कुर्वन्ति। अत्रावसरे राष्ट्रपतिना, उपराष्ट्रपतिना, प्रधानमन्त्रिणा च विश्वस्य सर्व्वानपि जनानालक्ष्य स्वकीयाः शुभकामनाः प्रकटीकृताः। राष्ट्रपति-पदासीना द्रौपदी मुर्मुः सामाजिकान्तर्जालिक-सन्देशे अवसरेऽस्मिन् नागरिकान् एकतायै सन्दिष्टवती। भाजपाध्यक्षः केन्द्रीयमन्त्री जे.पी.नड्डा इत्येषः अद्य नवदिल्ल्यां स्वीयावासे होलिकोत्सवं समाचरितवान्। अवसरेऽस्मिन् दलकार्यकर्तृभिः अन्यजनैश्च तेन सह अयमुत्सवः समाचरितः। दिल्ली-भाजपाप्रमुखः वीरेन्द्र-सचदेवा इत्येषोऽपि अत्रावसरे उपस्थितः आसीत्। दिल्ली-प्रदेशस्य मुख्यमन्त्री रेखा-गुप्तापि समेभ्यः देशवासिभ्यः अस्य पर्व्वणः शुभकामनां प्रकल्पितवती। स्वीये सन्देशे तया प्रोक्तं यत् अयमुत्सवः न केवलं वर्णानामेव अपितु सुदृढसम्बन्धानां,सौहार्दभावनानाञ्चापि प्रतीकमस्ति। उत्तरप्रदेशे व्रजमण्डलादारभ्य अयोध्याक्षेत्रपर्यन्तं होलिकोल्लासः समग्रेऽपि प्रदेशे दृष्टिपथम् अवतरति। मुख्यमन्त्री योगी-आदित्यनाथः अद्य गोरखपुरे भगवतः नृसिंहस्य विश्वयात्रां

हरितध्वजप्रदर्शनपुरस्सरं प्राचालयत्। मुख्यमन्त्रिणा जनेभ्यः शुभकामना प्रयच्छता प्रोक्तं होलिकोत्सवः एकतां स्मारयति।

## पुतिन -यूक्रेन-युद्धविरामः

युक्रेनदेशे जायमाने संघर्षे निरन्तरम् अवधानाय रूस्देशस्य राष्ट्रपतिना व्लादिमीर् पुतिनेन प्रधानमन्त्रिणं नरेन्द्रमोदिनं, अमेरिकीराष्ट्रपतिं डोनाल्ड इत्येतं समेत्य विश्वस्य नेतृभ्यश्च स्वीया कृतज्ञता प्रकटिता। गतसायं बेलारूस्-राष्ट्रपतिना अलेक्जेण्डर् लुकाशेन्को इत्यनेन सह संयुक्त-वार्ताहरसम्मेलने श्री पुतिनेन युद्धग्रस्तक्षेत्रेषु शान्तिं संस्थापनाय प्रधानमन्त्रिणं मोदिनं समेत्य ब्राजील-दक्षिण-आफ्रिका-देशयोः राष्ट्रपतिभ्यां, विश्वस्य नेतृभ्यश्च आभार-भारं प्रकटीकृतम्। गतमासे व्हाइट-हाउस् इत्यत्र राष्ट्रपतिना ट्रम्पेन सह उपवेशने श्रीमोदी रूस-युक्रेनयोः संघर्षे भारतं तटस्थं नास्ति इति विज्ञापितवान्,तथैव भारतं शान्तिमिच्छति इत्यपि बोधितवान्। पूर्वं अमेरिकादेशेन त्रिंशत्दिवसात्मकः दिवसानां युद्धविरामः प्रस्तावितः । राष्ट्रपतिना पुतिनेन युद्धविरामस्य समर्थनं कुर्वता स्वीकृतं यत् अस्मिन् विषये अवधानमावश्यकम् इति, प्रस्तावः कथं कार्यान्वितः भविष्यति इत्यस्मिन् विषये तस्य गम्भीराः प्रश्नाः सन्ति इत्यपि सः अवदत्।

## पूर्वोत्तर-केसरकेन्द्रम्-

केन्द्रीयविज्ञान-प्रौद्योगिकी-राज्यमन्त्री जितेन्द्र-सिंह: अद्य प्रोक्तवान् यत् पूर्वोत्तरभारतं विकसितभारतस्य स्वप्नं पूरयितुं मुख्यप्रेरकशक्तिः वर्तते। सहैव तेन प्रख्यापितं यत् स्थलमिदं देशे केसरस्य मुख्यकेन्द्रत्वेन स्वीयां भूमिकाम् आविष्करिष्यति। शिलांगस्थले नेक्टर इत्यस्य नूतनस्थायी-परिसरस्य आधारशिलां संस्थापयन् डॉ. सिंहः प्रोदीरितवान् यत् एकविंशत्यधिक-द्विसहस्त्रवर्षादारभ्य सरकारस्य केसराभियानेन सिक्किम- अरुणाचलप्रदेश-मेघालयादिषु केसरकृषेः विस्तारो विहितः।

## तमिलनाडु-रुपया

केन्द्रीय-वित्तमन्त्री निर्मला-सीतारामन इत्येषा आर्थिक-सर्वेक्षण-पुस्तिकायां मूलरुप्यकस्य प्रतीकपरिवर्तनार्थं डी-एम-के-सर्वकारस्य आलोचनां विहितवती। वित्तमन्त्रिणा डी-एम-के-सर्वकारः प्रतीकस्य अनादरार्थं आक्षिप्तः। तया समुदीरितं यत् अस्य चित्रणं यू-पी-ए-सर्वकारस्य कार्यकाले स्वीकृतमासीत्। पूर्वमुख्यमन्त्री विपक्षिनेता ई.पलानीसामी इत्येषोऽपि डीएमके-सर्वकारं अनुचितराजनीत्यै आरोपितवान् । अत्रान्तरे तमिलनाडुराज्ये विधानसभायाः अर्थसङ्कल्पना-सत्रमपि समारब्धम्। राज्यसर्वकारस्य तमिलनाडुराज्य-विपणन-निगमे कथितभ्रष्टाचारमालक्ष्य चर्चायै विपक्षनेत्रा ई.पलनीसामी इत्यनेन अनुरोधो विहितः। परञ्च अध्यक्षेण एम. अप्पावु इत्यनेन अनुरोधः निराकृतः यतः परं विधानसभायां कोलाहलः सञ्जातः।

ट्रम्प -ग्रीनलैण्ड्:

अमेरिकीराष्ट्रपतिः डोनाल्ड ट्रम्प इत्येषः उक्तवान् यत् अमेरिकादेशः डेन्मार्कदेशस्थ ग्रीनलैण्ड्-क्षेत्रस्योपरि आधिपत्यं स्थापयिष्यति। सः गतदिने व्हाइट हाउस् इत्यत्र नाटो-महासचिवेन मार्क रुट् इत्यनेन सह उपवेशनक्रमे एतत् प्रोक्तवान्। राष्ट्रपतिः ट्रम्प इत्येषः अवदत् यत् नाटो-सङ्घस्य प्रमुखः अधिग्रहणे प्रमुखां भूमिकां निभालयिष्यति। तस्मिन् एव काले नाटो-महासचिवः रुट् इत्येषः अवदत् यत् राष्ट्रपत्युः ट्रम्पस्य ग्रीनलैण्ड्-क्षेत्रं प्राप्तुं प्रयत्नानाम् विषये यत्किमपि चर्चा भवति तत् तस्य अधिकारक्षेत्रात् बहिः अस्ति, सः नाटो-सङ्घं अस्मिन् प्रकरणे सम्मेलितुं नेच्छति ।

एमईए-पाक ट्रेन:

भारतेन उक्तं यत् पाकिस्तानस्य आरोपाः निराधाराः सन्ति इति। पाकिस्तानस्य टिप्पण्याः विषये नवदिल्ल्यां वार्ताहराणां प्रश्नानां प्रतिक्रियारूपेण विदेशमन्त्रालयस्य प्रवक्ता रणधीरजयसवालः अवदत् यत् पाकिस्तानस्य निराधारारोपाः भारतं दृढतया अस्वीकरोति। सः अवदत् यत् वैश्विक-आतङ्कवादस्य केन्द्रं कुत्र अस्ति इति समग्रं विश्वं जानाति। श्रीजायसवालः अवदत् यत् पाकिस्तानेन स्वस्य आन्तरिकसमस्यानां असफलतानां च अन्येषां उपरि दोषारोपणात् प्राक् स्वान्तः द्रष्टव्यः।

विश्वपैरा एथलेटिक्स:

भारतेन दिल्ल्यां पञ्चविंशत्यधिक-द्विसहस्रतमवर्षस्य विश्वपैरा-एथलेटिक्स-ग्रैण्ड-प्रिक् इत्यस्मिन् उल्लेखनीयाभियानस्य समापनं कृतम्, अस्मिन् पञ्चचत्वारिंशत् स्वर्णपदकानि, चत्वारिंशत् रजतपदकानि, ऊनपञ्चाशत् कांस्यपदकानि च समेत्य चतुःत्रिंशोत्तरैकशतपदकैः सह भारतं पदकतालिकायां शीर्षस्थानं अभजत् ।

ऋतुविभागः-ताप तरङ्गः

भारतऋतुविज्ञानविभागेन आगामिदिनद्वये छत्तीसगढ- झारखण्ड-विदर्भ-पश्चिमबङ्ग, तेलंगाना-आन्ध्रप्रदेशस्थेषु विविधस्थानेषु तापतरङ्गस्य स्थितेः पूर्वानुमानं प्रख्यापितम्। आगामिदिनत्रयेषु ओडिशायाः केषुचित् स्थलेष्वपि अपि तीव्रतापतरङ्गस्य स्थितिः भवितुमर्हति । पूर्वभारते अधिकतमतापमाने क्रमिकरूपेण प्रायः द्वित्रि-डिग्री-सेल्सियसपर्यन्तं वृद्धिः भविष्यति इति विभागेनोक्तम् । ऋतुविभागेन आगामिदिनद्वये जम्मू-कश्मीरे-लद्दाखे-गिल्गिते-बाल्टिस्ताने-मुजफ्फरबादे-हिमाचल-प्रदेशे, उत्तराखण्डे च अत्यधिकवृष्टेः, हिमपातस्य च पूर्वानुमानं कृतम् अस्ति हरियाणा, पश्चिमोत्तरप्रदेश, राजस्थान, पञ्जाब, पूर्वोत्तरप्रदेशेषु चापि अवरतः मध्यमवृष्टेः सम्भावना प्रकटितास्ति।

बैडमिंटन

बर्मिंघम इत्यत्र आल-इंग्लैंड-ओपन-सुपर-1000 इत्यस्यां प्रतिस्पर्धायां भारतस्य लक्ष्यसेनं प्रागुपान्त्यचक्रीय प्रतिस्पर्धायां चीनस्य ली-शी-फेंग इत्यनेन पराजितम्। तत्रैव ट्रिसाजॉली-गायत्रीगोपीचन्दयो: महिला युगलं अद्य सायं प्रागुपान्त्यचक्रीय प्रतिस्पर्धायां चीनस्य महिला यगलं सम्मुखी करिष्यति।

।। इति वार्ता:।।